द्वितीया; द्वितीयासहकृतं प्रथमेति, चतुर्थादिसहकृतत्वेऽनवस्थापातः, तस्मान्न शास्त्रेण श्रद्धायाः सहकारित्वावगतिः संभवति ।

ननु कीर्त्तनस्य कारणत्वविषयिणी श्रद्धा; न पुष्कलकारणत्वविषयिणी, अतः कीर्त्तनमात्रविषयत्वेऽपि तस्या न सहकारित्वव्याघातः ।

तदयुक्तम्, श्रद्धा हि 'साधनमिदं साध्यं न कदाचिद् व्यभिचरति' इति प्रत्ययः, स च पुष्कलकारण एवावकल्पते न कारणमात्रे, तस्माद्दुर्वार एवायं दोषः ।

की प्राप्ति होती है, इसलिये शास्त्रसे श्रद्धाके सहकारका ज्ञान सम्भव नहीं है।*

पूर्वपक्षी—श्रद्धा तो कीर्तनकी कारणताको ही अपना विषय बनाती है, पुष्कल-कारणताको नहीं, 'अतः श्रद्धा केवल कीर्तनको विषय करनेवाली है' ऐसा माननेपर भी 'वह कीर्तनके फल-साधनमें सहायक होती है' यह स्वीकार कर लेनेमें कोई आपत्ति नहीं है।

सिद्धान्ती—यह कथन ठीक नहीं है, क्योंकि 'यह साधन कभी साध्यसे पृथक् नहीं होता' ऐसा विश्वास ही श्रद्धा है; और ऐसा विश्वास पुष्कल कारणमें ही किया जा सकता है, कारणमात्रमें नहीं, अतः उक्त [चक्रकापत्ति और अनवस्था आदि] दोषका वारण करना कठिन ही है।

---

* उपर्युक्त कथनका निचोड़ इतना ही है कि कीर्तन स्वतन्त्ररूपसे पापक्षयका साधक है, श्रद्धा हो तो कोई आपत्ति नहीं, परन्तु न हो तो कीर्तनके फलमें कमी नहीं आ सकती। इसलिये पूर्वपक्षीका यह मत, कि श्रद्धासहित किया हुआ कीर्तन ही पापक्षयका कारण है, ठीक नहीं। शास्त्र और युक्तिसे श्रद्धाकी अनिवार्यता सिद्ध नहीं होती।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ननु शास्त्रतः कीर्त्तनादेरेव पावनत्वं विश्वासस्य तु प्रमाणान्तरावसेयं सहकारित्वम्, सोऽपि शास्त्रावगतं कीर्त्तनमात्रादेरेव पावनत्वमवलम्बते, तत्र च नोक्तो दोषः।

एवं तर्हि यस्मिन्नारोग्यादावन्वयव्यतिरेकौ दृश्येते विश्वासस्य तत्र सहकारित्वमस्तु; पापक्षयः पुनरतीन्द्रियत्वान्न श्रद्धाकिञ्चित्कारमपेक्षते।

ननु यद्यवगम्यते सहकारित्वमेकत्र श्रद्धायाः तर्हि शक्यत

पूर्वपक्षी—परन्तु शास्त्रसे तो कीर्तन आदिकी ही पावनता सिद्ध होती है, विश्वासकी तो प्रमाणान्तरसे निश्चित की हुई सहकारिता है, और वह (विश्वास) भी शास्त्रसे ज्ञात हुई कीर्तनमात्रादिकी पावनताका ही आश्रय लेता है, अतः वहाँ पूर्वोक्त दोष नहीं है।

सिद्धान्ती—यदि ऐसा कहते हो तो जिस आरोग्य आदिमें विश्वासके अन्वय-व्यतिरेक [अर्थात् विश्वास होनेपर आरोग्य-लाभ होना और विश्वास न होनेपर आरोग्य-लाभ न होना आदि] देखे जाते हैं वहाँ उसकी सहकारिता रहे, परन्तु पापक्षय तो इन्द्रियोंसे गम्य नहीं है, अतः वह श्रद्धाकी कुछ भी सहायता नहीं चाहता।

पूर्वपक्षी—यदि एक जगह श्रद्धाकी सहकारिता ज्ञात होती है तो अन्यत्र भी उसका अनुमान किया ही जा सकता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवानुमातुमन्यत्रापि, तथा हि—पापक्षयः श्रद्धादिसहित-साधनवान्; कर्मफलत्वात्, आरोग्यादिवत्।

तदयुक्तम्, कालात्ययापदिष्टत्वाद्धेतोः, अवशेनेत्यादिशास्त्रविरोधात्, सोपाधिकत्वाच्च; मानान्तरयोग्यत्वं हि तत्रोपाधिः, तस्य च

है। वह अनुमान इस प्रकार होता है—पापक्षय श्रद्धा आदि-सहित साधनवाला है; क्योंकि वह कर्मका फल है, जैसे आरोग्य होना आदि।

सिद्धान्ती—यह अनुमान असंगत है; क्योंकि 'अवशेनापि०' इत्यादि शास्त्रसे विरुद्ध होनेके कारण यहाँ [कर्मफलरूप] हेतु कालात्ययापदिष्ट* अर्थात् बाधरूप हेत्वाभाससे युक्त

---

* अनुमान-वाक्यमें सामान्यतः पक्ष, साध्य, हेतु और दृष्टान्त—ये चार बातें होती हैं, उक्त अनुमान-वचनमें 'पापक्षय' यह पक्ष है, 'श्रद्धादि साधनसे युक्त होना' यह साध्य है, 'कर्मफल' हेतु है और 'आरोग्यादि' दृष्टान्त है। हेतुके बाधित होनेपर पक्षमें साध्यकी सिद्धि नहीं होती है, हेतुके बाधक पाँच दोष हैं, जो हेत्वाभास कहलाते हैं, उनके नाम ये हैं—अनैकान्तिक, विरुद्ध, असिद्ध, सत्प्रतिपक्ष और कालात्ययापदिष्ट। यहाँ कालात्ययापदिष्ट नामक हेत्वाभास है, इसीको बाध भी कहते हैं; इसका लक्षण इस प्रकार है—'साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः। (जहाँ पक्ष साध्यसे रहित हो वह हेतु बाध या कालात्ययापदिष्ट कहा गया है)।' यहाँ कर्मफल होनेके कारण पापक्षयको श्रद्धादि साधनोंसे युक्त सिद्ध करना है, परन्तु 'अवशेनापि' इस वचनके अनुसार यदि मनुष्य विवश होकर भी श्रद्धादिके बिना ही भगवान्‌का नाम उच्चारण कर ले तो वह पापसे मुक्त हो जाता है। नामोच्चारणसे होनेवाला जो पापक्षय है उसमें श्रद्धादि साधनका अभाव है; अतः यहाँ पापक्षयरूप पक्ष श्रद्धादिरूप साध्यसे रहित है इसलिये कर्मफलरूप हेतु कालात्ययापदिष्ट है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'साधनाव्यापकत्वे सति साध्यव्यापक उपाधिः' इत्यस्मिन्नुदयननये

है, इसके अतिरिक्त यह हेतु सोपाधिक* भी है [इसलिये साध्यका साधक नहीं हो सकता]; मानान्तरकी योग्यता ही यहाँ उपाधि है। 'साधनमें व्यापक न होकर जो साध्यमें व्याप्त

---

* पूर्वोक्त हेत्वाभासोंमेंसे जो असिद्ध नामक हेत्वाभास है, वह तीन तरहका होता है, आश्रयासिद्ध, स्वरूपासिद्ध और व्याप्यत्वासिद्ध। जहाँ हेतु सोपाधिक (उपाधिविशिष्ट) हो वहाँ व्याप्यत्वासिद्ध नामक हेत्वाभास होता है। यहाँ पूर्वोक्त अनुमान-वाक्यमें जो कर्मफलरूप हेतु है वह उपाधिविशिष्ट है। मूलमें उपाधिका यह लक्षण बतलाया है कि 'जो साधनमें व्यापक न होकर साध्यमें व्यापक हो वह उपाधि है।' इस विषयको अधिक स्पष्ट करनेके लिये एक अन्य उदाहरण दिया जाता है—जैसे कोई कहे कि 'पर्वतो धूमवान् वह्निमत्त्वात्' (पर्वत धूमसे युक्त है; क्योंकि वहाँ अग्नि है) तो वहाँ आर्द्रेन्धनसंयोग (गीली लकड़ी और आगका संयोग) उपाधि है; क्योंकि यहाँ धूम साध्य है, और धूम जहाँ-जहाँ रहता है वहाँ-वहाँ अवश्य ही गीली लकड़ी और आगका संयोग होता है, इस प्रकार साध्यभूत धूममें तो आर्द्रेन्धनसंयोगरूप उपाधि व्यापक है; परन्तु साधनभूत अग्निमें यह उपाधि व्यापक नहीं है। जहाँ-जहाँ अग्नि है वहाँ-वहाँ सर्वत्र ही यदि आर्द्रेन्धनसंयोग होता तो यह साधनमें भी व्यापक होता, परन्तु देखा यह जाता है कि तपाये हुए लोहेमें अग्नि तो है, पर वहाँ आर्द्रेन्धनसंयोग नहीं है। इस तरह यह आर्द्रेन्धनसंयोग साध्यभूत धूममें व्यापक होकर साधनभूत अग्निमें व्यापक न होनेके कारण उपाधि है तथा इससे युक्त हेतु सोपाधिक है; अतः यह अनुमान प्रामाणिक नहीं रहा। इसी प्रकार पापक्षयरूप कार्य श्रद्धादिसे युक्त साधनोंद्वारा होनेवाला है; क्योंकि वह कर्मफल है। जैसे आरोग्यादि। [औषधसेवनरूप कर्म करनेसे मनुष्य नीरोग होता है; अतः आरोग्य आदि कार्य कर्मफल है तथा श्रद्धा और विश्वासपूर्वक ही औषध सेवन करनेसे आरोग्य-लाभ होता है; अतः श्रद्धादिसे युक्त औषध ही आरोग्यका साधन कहा जा सकता है] उपर्युक्त अनुमानके अनुसार श्रद्धायुक्त नाम-कीर्तन करनेसे ही

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

युज्यत एवोपाधित्वम्, 'साध्यसमव्याप्तिः' इति तु मतान्तरे, व्यापकानु-

रहता है वह उपाधि है' इस उदयनाचार्यके न्यायानुसार उसका उपाधि होना उचित ही है। साध्यसम व्याप्ति (साध्यके समान जिसकी व्याप्ति हो वह) उपाधि है—इस

पापक्षय हो सकता है बिना श्रद्धाके नहीं। यदि उक्त अनुमान प्रामाणिक होता तो सचमुच ऐसा ही माना जाता, पर यहाँ तो कर्मफलरूप हेतु ही सोपाधिक होनेके कारण व्याप्यत्वासिद्ध नामक हेत्वाभाससे बाधित हो जाता है। मूलके कथनानुसार मानान्तरकी योग्यता ही यहाँ उपाधि है। जो शब्दादि किसी एक प्रमाणके अतिरिक्त अन्य प्रत्यक्षादि प्रमाणोंसे भी ज्ञात हो उसे मानान्तरयोग्य कहते हैं। जिस प्रकार वैद्यकशास्त्रीय शब्दप्रमाणसे जाना जाता है कि औषध-सेवनसे आरोग्य-लाभ होता है, परन्तु यह आरोग्यलाभ प्रत्यक्ष और अनुमानसे भी सिद्ध है, औषध-सेवनसे दूसरोंका लाभ होते देखा गया है, अतः अपने लिये अनुमानतः आरोग्य-लाभ होनेका विश्वास होता है, अतएव औषधसेवनमें श्रद्धा होती है। इसलिये औषध-सेवनमें होनेवाली श्रद्धा शब्दप्रमाणके अतिरिक्त प्रत्यक्ष और अनुमानप्रमाणकी भी योग्यता रखती है। इसी प्रकार जहाँ-जहाँ भी श्रद्धा होती है, वहाँ-वहाँ प्रमाणान्तरकी योग्यता होती है। उपर्युक्त अनुमान-वाक्यमें श्रद्धा ही साध्य है, उसमें मानान्तर-योग्यतारूप उपाधि व्यापक है—यह बात स्पष्ट हो गयी। अब देखना चाहिये हेतुमें भी मानान्तरयोग्यता व्यापक है या नहीं? यहाँ हेतु है कर्मफल। यद्यपि आरोग्यादि कर्मफलोंमें प्रत्यक्षादि प्रमाणोंकी पहुँच होनेसे कर्मफलमें भी मानान्तर-योग्यता देखी जाती है, तथापि वह उसमें पूर्णतया व्यापक नहीं है, क्योंकि पापक्षयरूप जो कर्मफल है वह प्रत्यक्ष या अनुमानसे नहीं जाना जा सकता। वह तो शब्दप्रमाणसे ही जाना जाता है। अतः मूलोक्त लक्षणके अनुसार साध्यमें व्यापक होकर साधनमें अव्यापक होनेके कारण यहाँ हेतु मानान्तर-योग्यतारूप उपाधिसे युक्त होकर बाधित हो जाता है, इसलिये उक्त अनुमान अप्रामाणिक रहा, अतएव नाम-कीर्तनमें श्रद्धाकी अनिवार्यता नहीं सिद्ध हुई।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पलब्धिलिङ्गकानुमानबाध एवेत्यलमतिप्रसङ्गेन ।

का तर्हि गतिः "श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत्" इत्यादीनाम् ?

अन्य मतमें तो व्यापककी उपलब्धि न होनेके कारण अनुमानका बाध ही हो जायगा* । अब इस विषयमें अधिक विस्तारकी आवश्यकता नहीं है।

पूर्वपक्षी—[यदि ऐसी बात है] तो "श्रद्धारूपी धनसे सम्पन्न होकर आत्मामें ही आत्माको देखे" इत्यादि वाक्योंकी क्या दशा होगी ?

---

* अन्य मतमें जो उपाधिका लक्षण दिया गया है उसका स्पष्ट अर्थ यह है कि जहाँ-जहाँ साध्य हो वहाँ-वहाँ जो साध्यके साथ ही व्याप्त हो वह उपाधि है । यहाँ श्रद्धा आदि साध्य हैं, और जहाँ-जहाँ श्रद्धादि हैं वहाँ-वहाँ यदि मानान्तरयोग्यत्व भी हो तो वह साध्यके साथ पूर्णतया व्यापक हो सकता है। यद्यपि अन्य आरोग्यादि कर्मफलोंमें श्रद्धादि साधनके साथ प्रत्यक्षादि प्रमाणान्तरोंसे ज्ञात होनेकी योग्यता भी प्राप्त होती है परन्तु 'पापक्षय' में यह बात देखनेमें नहीं आती । 'पापक्षय' रूप कर्मफलमें श्रद्धादि साधन तो है परन्तु वहाँ शब्दातिरिक्त अन्य प्रमाणकी पहुँच नहीं है [अर्थात् शास्त्रीय वचनसे ही पापक्षय होना जाना जाता है, प्रत्यक्ष नहीं देखा जाता।] इसलिये वहाँ मानान्तरयोग्यत्वरूप व्यापककी उपलब्धि न होनेके कारण पूर्वोक्त अनुमानका बाध हो जायगा। बाधक अनुमानका वाक्य इस प्रकार होगा—'पापक्षयो न श्रद्धादिसहितसाधनवान् तथार्थे मानान्तरायोग्यत्वात् ।' अर्थात् पापक्षय श्रद्धा आदिसे युक्त साधनवाला नहीं है; क्योंकि उसके वैसा होनेमें किसी अन्य प्रमाणकी योग्यता नहीं है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उच्यते—न तत्र श्रवणादिविधिवाक्यार्थविषयिणी श्रद्धा श्रवणादेः सहकारित्वेन विधीयते, किन्तर्हि ? तत्त्वमस्यादिवाक्यार्थविषयिणी, सा च न प्रतीचः परत्वे वाक्यार्थेऽन्त-

---

सिद्धान्ती—बतलाते हैं—[श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम् (अभयपदके इच्छुकोंको भगवान्के नामोंका श्रवण, कीर्तन और स्मरण करना चाहिये)] इत्यादि श्रवण तथा कीर्तनादिसे सम्बन्ध रखनेवाले जो विधिवाक्य हैं, उनके अर्थको विषय करनेवाली श्रद्धाका यहाँ श्रवणादिकी सहकारिणीरूपसे [अर्थात् श्रवण, कीर्तन आदिमें साथ-साथ श्रद्धाका रहना आवश्यक है—इत्यादिरूपसे] विधान नहीं किया जाता तो किसका विधान किया जाता है ? 'तत्त्वमसि' (वह ब्रह्म तू ही है) इत्यादि वाक्योंके अर्थको विषय करनेवाली श्रद्धाका ही यहाँ विधान किया जाता है* वह (तत्त्वमसि आदि वचनोंके अर्थको विषय करनेवाली) श्रद्धा भी 'जीवात्मा ही परब्रह्म है' इस अभिप्रायवाले [तत्त्वमसि आदिके] वाक्यार्थमें अन्तर्भूत (अन्वित) नहीं होती अपि तु ब्रह्म और आत्माके एकत्वका निश्चयात्मक ज्ञान करानेके लिये

---

* अर्थात् 'श्रद्धावित्तो भूत्वा' आदि वाक्यका यह अभिप्राय है कि 'जीव और ब्रह्मकी एकताका प्रतिपादन करनेवाले वचनोंपर विश्वास करके अपनेमें ही ब्रह्मभावकी अनुभूतिका प्रयत्न करना चाहिये।'

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवति; अपि तु प्रमाणेतिकर्तव्यतात्वेन बहिरेवावतिष्ठते, न च तत्रोक्तदोषप्रसङ्गः, "श्रद्धयाग्निः समिध्यते" इत्यादि तु प्रवृत्तिहेतोः श्रद्धायाः स्तावकप्रवृत्तिं विना पुरुषार्थस्यैवासिद्धेः।

ननु यदि प्रवृत्तिहेतुः श्रद्धा, आयातमधिकारिविशेषणत्वं श्रद्धायाः ?

एक सहकारी साधनके रूपमें वाक्यार्थसे बाहर ही रहती है* इसलिये वहाँ [कीर्तनादिमें श्रद्धाका होना स्वीकार किये विना 'श्रद्धावित्तो भूत्वा' आदि वाक्य व्यर्थ होते हैं इत्यादि] पूर्वोक्त दोषकी आपत्ति नहीं है। "श्रद्धासे अग्नि प्रज्वलित होती है" इत्यादि वचन तो इसलिये कहे गये हैं कि श्रद्धा उस (यागादि) में प्रवृत्ति करानेका हेतु है; अतः उसके प्रशंसक वाक्योंका उपयोग किये विना पुरुषार्थमें किसीकी स्वतः प्रवृत्ति न होनेके कारण पुरुषार्थ ही असिद्ध हो जायगा।

पूर्वपक्षी—यदि श्रद्धा प्रवृत्ति करानेमें हेतु है, तब तो 'वह (श्रद्धा) अधिकारीका विशेषण है [अर्थात् किसी भी कर्ममें श्रद्धावान्‌का ही अधिकार है]' यह बात स्वतः सिद्ध हो गयी।

---

* 'श्रोतव्यः कीर्तितव्यः' इत्यादि वाक्यमें तो श्रद्धाका वाक्यार्थमें अन्तर्भाव (अन्वय) हो सकता है, जैसे श्रद्धया श्रोतव्यः (श्रद्धापूर्वक श्रवण करे) आदि। परन्तु 'तत्त्वमसि' आदि वाक्यके 'वह ब्रह्म तू ही है' आदि अर्थमें श्रद्धाका अन्वय नहीं हो सकता; क्योंकि 'श्रद्धापूर्वक या श्रद्धासे वह ब्रह्म तू है' इत्यादि कथन नहीं बनता। इसलिये यहाँ श्रद्धाके विधानका इतना ही तात्पर्य है कि 'तत्त्वमसि' आदि वाक्यपर श्रद्धा करनेसे धीरे-धीरे ब्रह्मात्मैक्यका निश्चय होता है, इस प्रकार श्रद्धा उक्त निश्चयमें सहायक होती है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मैवम्, अशाब्दत्वात् ।

नन्वशाब्दमपि सामर्थ्यवद् विद्वत्तावच्चाधिकारिविशेषणं भवत्येव शब्दापेक्षितत्वात्, श्रद्धा च शब्दापेक्षिता भवति, असमर्थस्याविदुषोऽश्रद्दधानस्यानुष्ठानायोगात् । अतोऽधिकारिविशेषणमेव श्रद्धेति ।

सिद्धान्ती—ऐसा न कहो, क्योंकि यह बात [स्मृति या पुराणोंके] शब्दसे नहीं निकलती ।

पूर्वपक्षी—शब्दतः प्रतिपादित न होनेपर भी सामर्थ्य और विद्वत्ताकी भाँति शब्दसे अपेक्षित होनेके कारण श्रद्धा भी अधिकारीका विशेषण हो ही सकती है। शब्दसे श्रद्धाकी भी अपेक्षा प्रतीत होती है; क्योंकि असमर्थ, अविद्वान् और अश्रद्धालु पुरुष विधिके अनुष्ठानमें प्रवृत्त नहीं हो सकता, अतः श्रद्धा अधिकारीका विशेषण ही है।*

---

* पूर्वपक्षीका अभिप्राय यह है कि यद्यपि किसी वचनमें प्रायः यह स्पष्टरूपसे नहीं कहा गया रहता है कि, वही पुरुष कर्म करे जो उसे करनेमें समर्थ हो और उसे जानता हो, तथापि असमर्थ और अनजान पुरुष उस कर्मको कर ही नहीं सकता, इसलिये उस वचनसे अपेक्षित होनेके कारण यह नियम स्वीकार किया जाता है कि समर्थ और जानकार पुरुष ही कर्म करे। इसी प्रकार 'कीर्तनादिमें श्रद्धालुका ही अधिकार है' ऐसा स्पष्ट वचन न होनेपर भी श्रद्धाहीन पुरुष उसमें प्रवृत्त नहीं हो सकता, इसलिये उक्त नियम स्वीकार किया जा सकता है क्योंकि सामर्थ्य और जानकारीकी भाँति श्रद्धाकी भी अपेक्षा शब्दसे प्रतीत होती है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

असार्वत्रिकमेतत्; यद्धि बहुलाङ्गं—बहुधनसाध्यं वा बहुकालव्यापि वा स्वरूपेण वा दुष्करं कर्म तत्र न कश्चिदपि श्रद्धां विना प्रवर्तत इति भवत्यधिकारहेतुः श्रद्धा, यत्र पुनः सुकरे कीर्तनादौ प्रकारान्तरेणापि प्रवृत्तिः संभवति तत्रानुपपत्तेरभावादश्रुतत्वाच्च नियमपरिकल्पनायोगान्नैवाधिकारहेतुः श्रद्धेति।

भक्तिनिमित्तकव्यवस्थायाः प्रत्याख्यानम्

भक्तेरप्यधिकारिविशेषणत्वं न संभवति, सा हि श्रवणादिनव-

सिद्धान्ती—यह नियम सर्वत्रके लिये नहीं है, जो कर्म बहुत-से अङ्गोंवाला, अधिक धनसे सिद्ध होनेयोग्य, अधिक समयतक चालू रहनेवाला अथवा स्वरूपसे ही दुष्कर है, उसमें श्रद्धाके विना कोई प्रवृत्त नहीं होता, इसलिये वहाँ श्रद्धा अधिकारमें हेतु होती है। परन्तु जिस कीर्तन आदि सुकर कार्यमें श्रद्धाके विना ही दूसरे प्रकारसे भी प्रवृत्ति होनी सम्भव है वहाँ श्रद्धाके अनिवार्य होनेका नियम करना उचित नहीं है; क्योंकि वैसा नियम न करनेपर भी कोई अनुपपत्ति नहीं दीख पड़ती और किसी वचनद्वारा उस नियमका श्रवण भी नहीं होता है। इसलिये श्रद्धा [कीर्तनादिमें] अधिकारका कारण नहीं हो सकती।

इसी प्रकार भक्तिको भी अधिकारीका विशेषण मानना सम्भव नहीं है, क्योंकि [विशेषण माननेके पहले यह विचार लेना आवश्यक है कि यहाँ भक्तिका स्वरूप क्या है?] क्या श्रवण, कीर्तन आदि नव प्रकारोंसे भगवान्‌का भजन करना ही

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विधभजनलक्षणा भावलक्षणा वा ? न तावद् भजनलक्षणा तस्यामेवाधिकारहेतोर्जिज्ञासितत्वात्, नापि भावलक्षणा; सा हि फलं निमित्तं वा ? तत्र यदि फलम्, काम्यमानतयैव तस्या अधिकारिविशेषणत्वं न स्वरूपेण, तथा च सति भक्तिकामस्याधिकारः स्यान्न भक्तस्य। न च तस्याप्यधिकारः, ब्रह्महादेर्हननादिजनितदोषनिरासार्थिनोऽधि-

---

भक्तिका स्वरूप है ? या वह भावरूपा है ? नवविध भजन तो उसका स्वरूप हो नहीं सकता; क्योंकि उसीमें अधिकार होनेके हेतुकी जिज्ञासा हुई है [अर्थात् 'श्रवण-कीर्तनादिमें भक्तिमान्का ही अधिकार है' इस कथनसे यह स्पष्ट जान पड़ता है कि, भक्ति कीर्तनादिसे भिन्न कोई वस्तु है जिससे युक्त होनेपर ही मनुष्यका कीर्तनादिमें अधिकार हो सकता है, यदि कीर्तनादि नवविध भजनको ही भक्तिका स्वरूप मानें तो वह कीर्तनादिरूपा भक्ति स्वयं अपनेमें ही अधिकारका हेतु कैसे हो सकती है ?]। वह भक्ति भावरूपा भी नहीं है; क्योंकि वैसा माननेपर यह प्रश्न उठता है कि भावरूपा भक्ति श्रवण-कीर्तनादिका फल है या निमित्त ? यदि फल है तो कामनाका विषय होनेके कारण ही वह अधिकारीका विशेषण हो सकती है, स्वरूपसे नहीं। ऐसी दशामें भक्तिकी कामना करनेवालेका ही उसमें अधिकार हो सकता है भक्तका नहीं। भक्तिकी कामनावालेका भी उसमें अधिकार

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतत्वात् । न च भक्तिकामाधिकारे दोषनिरासोऽप्यन्तर्भवति, अक्षीणदोषस्य भक्तेरनुदयात्—

नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ।

इति वचनादिति वक्तव्यम्, तस्य द्वारमात्रत्वेनानुद्देश्यत्वात् ।

ननु तर्हि निमित्तं भक्तिः श्रवणादिविधेः; तत्र च तस्याः

नहीं कहा जा सकता; क्योंकि हत्या आदि दोष दूर करनेकी इच्छा रखनेवाले ब्रह्महत्यारे आदिका वहाँ अधिकार बताया गया है। यदि कहो—

"जिनके पाप क्षीण हो गये हैं उन मनुष्योंकी ही श्रीकृष्णचन्द्रमें भक्ति होती है।"

इस वचनके अनुसार जिसके पाप क्षीण नहीं हुए हैं उसमें भक्तिका उदय ही नहीं हो सकता; अतः भक्तिकी कामनावालेके अधिकारमें दोष-निराकरणका भी अन्तर्भाव हो जाता है। [अर्थात् जब पाप क्षीण हुए बिना भक्ति हो ही नहीं सकती तो जिसे भक्तिकी कामना है उसे पापक्षयकी कामना भी है ही; अतः पापक्षयकी कामनावालेका अधिकार भी भक्तिकामोंके अधिकारके अन्तर्गत ही है] तो यह कथन उचित नहीं है, क्योंकि पापक्षय भक्तिका द्वार (विधेय) मात्र ही है, उद्देश्य नहीं। ['पापक्षय होनेपर ही भक्ति होती है' इस कथनसे तो यह सिद्ध होता है कि पापक्षय उद्देश्य है और भक्ति विधेय, पर यह मत मान्य नहीं है]।

पूर्वपक्षी—तब तो भक्ति श्रवणादि विधिकी निमित्त सिद्ध होती है और भक्ति तथा पापक्षयकी कामना—ये दोनों साथ-ही-साथ उस (श्रवणादि) में अधिकारके हेतु निश्चित होते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पापक्षयकामनायाश्च संवलितयोरधिकारहेतुता जातेष्टाविव पुत्र-जन्मनः तत्पूतत्वादिकामनायाश्च ।

इदमप्यसाधीयः, भक्तेरेव श्रवणाद्यनुष्ठानात्प्रागसिद्धेः, यथोक्तं श्रीभागवते—

शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्त्तनः ।
हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत्सताम् ॥

हैं। जैसे जातेष्टि [यानी पुत्र उत्पन्न होनेपर उसकी शुद्धि आदिके लिये किये जानेवाले जातकर्म-संस्कार] में पुत्र-जन्म और उसकी शुद्धि आदिकी कामना—ये दोनों साथ-ही-साथ उसमें अधिकारके हेतु माने गये हैं।

सिद्धान्ती—यह कथन भी ठीक नहीं है, क्योंकि ['जातेष्टि' शब्दके 'पुत्रे जाते या इष्टिः' इस विग्रहमें सप्तमी विभक्तिसे यह बात ज्ञात होती है कि पुत्रके जन्म लेनेपर ही उसकी शुद्धिके लिये जातकर्म-संस्कार होता है; अतः पुत्रका जन्म और उसकी शुद्धि आदिकी कामना—ये दोनों साथ ही अधिकारके हेतु निश्चित होते हैं, परन्तु यहाँ ऐसी बात नहीं है। यदि भक्ति होनेपर ही श्रवणादिका अनुष्ठान होता है—ऐसा कहें तो ठीक नहीं, क्योंकि] श्रवणादि विधिके अनुष्ठानसे पहले भक्ति ही सिद्ध नहीं होती; जैसा कि श्रीमद्भागवतमें कहा है—

"जिनका श्रवण और कीर्तन पावन है, जो संतोंके सुहृद् हैं, वे भगवान् कृष्ण अपनी कथा सुननेवालोंके हृदयमें रहते हुए उनके अशुभोंका नाश करते हैं।" "इस प्रकार सदा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitisaqtion by eGangotri

नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया ।
भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥

अत एवेदमपि प्रत्युक्तं यद् भावोदयादुपरितनानां पापानां भगवद्भजनं प्रायश्चित्तम्, प्राचीनानां तु स्मार्तमिति, श्रवणादिधौतपापस्यैव भावोदयप्रतिपादनात् । नष्टप्रायेति च नष्टानामप्यभद्राणां सत्सु कामादिषु पुनः पुनरुद्भवात् तन्निवृत्तेश्च भावैकसाध्यत्वात् ।

भगवद्भक्तोंकी सेवा करनेसे जब मनुष्यके अशुभ कर्म प्रायः नष्ट हो जाते हैं तब पुण्यश्लोक भगवान्में नैष्ठिकी भक्ति होती है ।"

इसीसे, जो ऐसा मानते हैं कि 'भगवद्भजन भावोदयके बाद होनेवाले पापोंका ही प्रायश्चित्त है, उसके पहलेके पापोंके लिये तो स्मृति-कथित प्रायश्चित्त ही कर्तव्य है ।' उनके मतका भी खण्डन हो जाता है; क्योंकि श्रवणादिसे जिसके पाप धुल गये हैं उसी पुरुषमें भावोदय होना कहा गया है । [अतः यदि उपर्युक्त मत मान लिया जाय तो 'भावका उदय होनेपर ही श्रवणादिरूप भजनमें प्रवृत्ति होगी और श्रवणादिरूप भजनसे ही भावका उदय होगा' इस प्रकार अन्योन्याश्रय दोषकी आपत्तिका वारण नहीं हो सकता] 'नष्टप्रायेषु' इसके द्वारा यह कहा गया है कि 'कामादिके रहनेपर नष्ट हुए अशुभोंकी भी पुनः प्रवृत्ति हो जाती है, इसलिये कामादिकी भी निवृत्ति एकमात्र भावसे ही साध्य है ।'

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

तदा रजस्तमोभावाः कामलोभादयश्च ये।
चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति ॥

इति वचनात्।

प्रीतेरधिकारहेतुत्वखण्डनम्

ननु तर्हि नैष्ठिकी भक्तिरास्ताम्, तस्याः श्रवणाद्यभ्यासपटिमसाध्यत्वात्; प्रीतिमात्रं पुनः प्रागपि जन्मान्तरसंस्कारवशात्संभवतीति तस्यैवाधिकारहेतुतेति।

तदसत्, प्रमाणाभावात्। "सर्वात्मना विदधते खलु भावयोगम्"

"उस समय (भावोदय हो जानेपर) रजोगुण और तमोगुणके कार्य जो काम और लोभ आदि हैं उनसे चित्त प्रभावित न होकर शुद्ध सत्त्वगुणमें स्थित हो प्रसन्न (निर्मल) हो जाता है।"

—इस वचनसे यही बात सिद्ध होती है।

पूर्वपक्षी—[यदि ऐसी बात है] तो नैष्ठिकी भक्ति अलग रहे; क्योंकि वह श्रवणादिका प्रौढ अभ्यास करनेसे ही साध्य हो सकती है। परन्तु प्रेममात्रका होना तो जन्मान्तरके संस्कारवश श्रवणादिके पहले भी सम्भव है, अतः वही श्रवणादिमें अधिकार होनेका हेतु रहे।

सिद्धान्ती—यह कथन असङ्गत है; क्योंकि इसमें कोई प्रमाण नहीं है। इस विषयमें "जो सब प्रकार भगवान्में भावयोग (भावभक्ति) करते हैं", "जो अन्य भावनाएँ त्याग-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"त्यक्तान्यभावस्य हरिः परेशः" इत्यादि तत्र प्रमाणम्, तच्च नैष्ठिकीमेवावलम्बते ।

भावरूपाया भक्तेः कीर्तनाङ्गत्वस्य निराकरणम् प्रसङ्गान्महद्दर्शनमाहात्म्यवर्णनं च

यत्तु यन्नामकीर्त्तनं भक्त्येति; तस्यापि न कीर्त्तनाङ्गं भक्तिरित्यर्थः, गुणफलाधिकारो हि सः, स्वत एव पापक्षयसाधनं कीर्त्तन-

---

कर भगवान्‌के चरणोंको भजता है उस प्रिय भक्तके हृदयमें स्थित होकर भगवान् परमेश्वर उसके दुष्कर्म-जन्य दोषोंको दूर करते हैं" इत्यादि वचन ही प्रमाणरूपमें उपलब्ध होते हैं, परन्तु वे नैष्ठिकी भक्तिका ही आश्रय लेते हैं [केवल प्रीतिको विषय नहीं करते] ।

और ऐसा जो कहा है कि "यन्नामकीर्तनं भक्त्या विलापनमनुत्तमम् (जिनका भक्तिपूर्वक किया हुआ नामकीर्तन [सम्पूर्ण पापोंका] सर्वोत्तम प्रायश्चित्त है)" इसका भी यह अर्थ नहीं है कि 'भक्ति कीर्तनका अङ्ग है [इसलिये भक्तिपूर्वक किया हुआ नामकीर्तन ही पापक्षयादि फलका साधक हो सकता है]।' वह तो गुणयुक्त फलका अधिकार बताया गया है [अर्थात् यह कहा गया है कि भक्तिपूर्वक नाम-कीर्तन करनेसे उसके फलमें विशेष्यता होती है]। तात्पर्य यह कि जो स्वतः ही पापक्षयका साधन है उस कीर्तनरूप कर्मका आश्रय लेकर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्माश्रित्य फलगतातिशयमुद्दिश्य भक्तेर्विधानादनुत्तमं विलापनमिति; "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति" इतिवत्। फलगतातिशयश्चात्र पापकारणानां रागादीनां निवृत्तिः, रागादिनिवृत्तेर्भक्तिसाध्यत्वस्याभिधानात्। "केचित्केवलया भक्त्या" इत्यत्रापि भजनक्रियैव भक्तिः; न भावः, तस्या एवाप्र-

---

फलमें विशेष्यता लानेके उद्देश्यसे भक्तिका विधान किया गया है, अतः जिस प्रकार [छान्दोग्योपनिषद्में] कहा है कि [यद्यपि ज्ञानी और अज्ञानी दोनों ही कर्म करते हैं तथापि मनुष्य] "जिसी कर्मको उसकी जानकारी प्राप्त करके श्रद्धा और मनोयोगपूर्वक करता है वही अत्यन्त प्रबल होता है" उसी प्रकार यहाँ भी [यद्यपि कीर्तन स्वतः ही समस्त पापोंका विलापन (नाशक) है तथापि भक्तिका योग होनेसे फलमें विशेष्यता होती है; अतएव] "अनुत्तमं विलापनम्—पापनाशका परम उत्तम साधन है"—ऐसा कहा गया है। पापके कारणभूत रागादि दोषोंका दूर हो जाना ही यहाँ फलमें विशेष्यता है; क्योंकि रागादि-निवृत्ति भक्तिसे ही साध्य बतलायी गयी है। "केचित्केवलया भक्त्या वासुदेवपरायणाः" इस वाक्यमें भी कीर्तनादिरूप भजन-क्रिया ही भक्ति कही गयी है भाव नहीं; कारण यह कि प्रकरण समाप्त होनेतक भजन-क्रियारूप भक्तिका ही विस्तार दिखलाया गया है।

---

१. कुछ वासुदेवपरायण पुरुष केवल भक्तिसे ही [अपने पाप नष्ट कर देते हैं]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करणसमासैः प्रपञ्चनात्। 'वासुदेवपरायणाः' इत्यत्रापि न भावः, कैवल्यविरोधात्।

ननु समानवाक्योपात्तस्य भावस्य व्यवच्छेदायोगात् तदतिरिक्तसाधनव्यवच्छेद एव कैवल्यम्।

'वासुदेवपरायणाः' इसमें भी भावका कथन नहीं है; क्योंकि ['केचित् केवलया भक्त्या' के] केवल पदसे उसका विरोध है [यदि भावका ग्रहण मान लें तो भाव और भजन-क्रिया दोनोंसे पापक्षय होनेके कारण 'केवल भक्तिसे' यह कथन विरुद्ध पड़ेगा]।

पूर्वपक्षी—[यदि 'भक्त्या' और 'परायणाः' शब्द दो वाक्योंमें होते तो दोनोंका अर्थ 'भजन-क्रिया' कर लेनेमें कोई आपत्ति नहीं थी, परन्तु यहाँ तो दोनोंका एक ही वाक्यमें प्रयोग है, अतः एक ही अर्थमें दो शब्दोंका प्रयोग व्यर्थ होनेके कारण दोनोंका दो अर्थ लेना आवश्यक है, ऐसी दशामें 'भक्ति' शब्दसे 'भजन-क्रिया' और 'वासुदेवपरायणाः' शब्दसे 'वासुदेवमें भाव (परा प्रीति) रखनेवाले भावुक भक्त' अर्थ लिया जा सकता है, इस प्रकार] एक वाक्यमें अर्थतः प्राप्त हुए 'भाव' को अलग करना असम्भव है, इसलिये ऐसा क्यों न मान लें कि भावयुक्त भजनके अतिरिक्त जो स्मृतिकथित प्रायश्चित्त आदि साधन हैं उन को पृथक् करना ही केवल शब्दका तात्पर्य है। [अभिप्राय यह कि भावुक भक्त केवल भजनसे ही पापक्षय कर लेते हैं, उन्हें स्मार्तप्रायश्चित्तकी आवश्यकता नहीं पड़ती]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नैवम्, श्रुतिविरोधिनो वाक्यस्य दुर्बलत्वात् । श्रुतिरिह केवलया भक्त्येति तृतीया । वासुदेवपरायणा धुन्वन्त्यघमिति तु वाक्यम् । अतो गर्भितोऽयं हेतुः—यस्माद्वासुदेवपरायणास्तस्मात्सकलमघं धुन्वन्तीति सर्वानुस्यूतः सर्वाधारश्च देवः परमयनमाश्रयो येषां तेषां सर्वेश्वरसनाथानामुचितमेव सर्वाघविजयित्वमिति भावः । अपि च स्वरूपेण तदाश्रयत्वे मुख्योऽयं शब्दः, भावस्य तु तदा-

---

सिद्धान्ती—ऐसा कहना ठीक नहीं; क्योंकि श्रुतिविरोधी वाक्य दुर्बल होते हैं । यहाँ केवलया भक्त्या (केवल भक्तिसे) इस वाक्यमें जो तृतीया विभक्ति (करण कारक) है वही श्रुति है [अर्थात् पापक्षयके साधनरूपसे तृतीयाविभक्त्यन्त 'केवल भक्ति' शब्दका ही मुख्यतया श्रवण होता है] 'वासुदेव-परायणा अघं धुन्वन्ति (वासुदेवपरायण जन अपना पाप नष्ट करते हैं)' यह अंश तो वाक्य है [इसमें साधनका निर्देश नहीं है] इसलिये 'वासुदेवपरायणाः' यह हेतुगर्भ विशेषण है; यथा—'वे वासुदेवपरायण हैं, इसलिये अपने सारे पापोंको नष्ट कर देते हैं ।' ['वासुदेवपरायणाः' का अर्थ यों है—] सबमें ओत-प्रोत और सबके आधारभूत देव (भगवान् वासुदेव) ही जिनके परम (उत्तम) अयन—आश्रय (सहारा) हैं, वे वासुदेवपरायण हैं । भाव यह कि जो सबके ईश्वर वासुदेवसे सनाथ हो चुके हैं उनका समस्त पापोंपर विजय पाना उचित ही है । इसके अतिरिक्त स्वरूपतः भगवान् वासुदेवका आश्रय लेनेके अर्थमें तो 'वासुदेवपरायणाः' शब्द मुख्य है, किन्तु भावके

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लम्बनत्वे गौणः, तस्मान्न भावस्य कीर्त्तनाङ्गत्वे प्रमाणमिदम्।

सकृन्मनः कृष्णपदारविन्दयो-
निवेशितं तद्गुणरागि यैरिह।

इत्यत्रापि विषयसौन्दर्यादेव प्राप्तस्य रागस्मरणस्य सुकरत्व-प्रतिपादनार्थमनुवादः।

एवं विमृश्य सुधियो भगवत्यनन्ते
सर्वात्मना विदधते खलु भावयोगम्।
ते मे न दण्डमर्हन्त्यथ यद्यमीषां
स्यात्पातकं तदपि हन्त्युरुगायवादः॥

भगवदाश्रित होनेके अर्थमें गौण है; [अतः मुख्यतः प्रतिपादित अर्थका ही ग्रहण करना उचित है] इसलिये भावको कीर्तनका अङ्ग बतलानेमें यह वाक्य प्रमाण नहीं हो सकता।

"जिन्होंने एक बार भी यहाँ भगवान् कृष्णके चरणारविन्दोंमें उनके गुणोंमें अनुराग रखनेवाला अपना मन लगा दिया है..."

—इस वाक्यमें भी विषयभूत परमात्माके सौन्दर्यसे ही [अनुरक्त हुए पुरुषके लिये] प्राप्त रागपूर्वक स्मरणकी सरलता बतलानेके लिये 'भाव' का अनुवाद किया गया है।

"विद्वान् पुरुष इस प्रकार विचारकर निश्चय ही भगवान् अनन्तमें सब प्रकारसे अपना भाव (प्रेम) स्थापित करते हैं। वे मेरा दण्ड पाने योग्य नहीं हैं, क्योंकि यदि उनमें पातक हो भी तो उसे उरुगाय (अनन्तकीर्ति) परमेश्वर-का नाम-कीर्तन नष्ट कर देता है।"

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यत्रापि पातकाभावादेव दण्डानर्हत्वम् ; तदभावश्च तत्कारणाभावात्। अत एवोक्तमथ यद्यमीषां स्यात्पातकमिति । रागाद्यभावेऽपि यदि कथञ्चित्प्रमादात्पातकं स्यादित्यर्थः; तदपि हन्त्युरुगायवाद इत्यपि न भावसहकृतं कीर्तनम्, अपिशब्दान्न केवलं भावोदयात्प्राचीनमेव; अपि तूपरितनमपि पातकं हन्त्युरुगायस्य बहुभिधानस्यानन्तानन्दसुधासिन्धोर्बहुभिर्गीयमानस्य वा सकलजगत्प्रशस्य-

---

यहाँ भी पातक न होनेके कारण ही उनमें दण्ड पानेकी योग्यताका अभाव है और पापका अभाव उसके हेतु (रागादि) का अभाव होनेके कारण है। इसीसे 'यदि उनमें पातक हो' ऐसा कहा है। तात्पर्य यह कि रागादि न होनेपर भी यदि किसी प्रकार प्रमादवश पातक हो जाय तो। 'उसे भी उरुगाय (महायशस्वी भगवान्) का कीर्तन नष्ट कर देता है' यह कथन भी यही सिद्ध करता है कि भावके साथ कीर्तन नहीं [अपि तु केवल कीर्तन ही पाप नष्ट कर देता है]। 'अपि' शब्दसे यह व्यक्त होता है कि केवल भावोदयसे पूर्वके पापको ही नहीं, अपि तु बादके पापको भी नष्ट करता है । उरुगायका अर्थ है बहुभिधान—अनन्त आनन्दामृतके समुद्र अथवा जो बहुतोंके द्वारा गाये जाते हैं, समस्त संसार जिनके पावन यशकी स्तुति करता है

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुण्यकीर्त्तेर्वाद: कीर्त्तनम् । भावस्तु विद्यमानोऽप्युदास्ते, अतितुच्छत्वात्पापनिवृत्तेरिति हि तस्यार्थ: ।

ये देवसिद्धपरिगीतपवित्रगाथा
ये साधव: समदृशो भगवत्प्रपन्ना: ।
तान्नोपसीदत हरेर्गदयाभिगुप्ता-
न्नैषां वयं त्वधिकृता: प्रभवाम दण्डे ॥

इत्यस्याप्ययमेवार्थ: । कथम् ? ये समदृश: सर्वात्मभावेन भगवन्तं पश्यन्ति, अतएव साधवो रागादिदोषरहितास्तान्नोपसीदत—तेषां समीपमपि मा यात, न ह्येषां वयं स्वामिन:, पापिनां हि निग्रहे

उन भगवान्का वाद—कीर्तन [पापको नष्ट कर देता है]। भाव तो विद्यमान होकर भी उदासीन रहता है; क्योंकि उसके लिये पापनिवृत्तिरूप फल बहुत तुच्छ है—यह उक्त वचनका भावार्थ है ।

ये देवसिद्धपरिगीतपवित्रगाथा
ये साधव: समदृशो भगवत्प्रपन्ना: ।
तान्नोपसीदत हरेर्गदयाभिगुप्ता-
न्नैषां वयं त्वधिकृता: प्रभवाम दण्डे ॥

—इसका भी यही अर्थ है। किस प्रकार ? [सो दिखलाते हैं—] जो समदर्शी हैं; सर्वात्मभावसे (सब जीवोंके आत्मारूपसे) भगवान्को देखते हैं अतएव जो साधु—रागादि दोषोंसे रहित हैं उनके यहाँ गमन मत करना—उनके निकट भी मत जाना, हम उनके स्वामी नहीं हैं, क्योंकि पापियोंका

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वयमधिकृताः, न तेषां पापगन्धोऽपि । अथ कथञ्चित्स्यात् पातकं तथापि वयं दण्डे न प्रभवामः, भगवत्प्रपन्ना हि ते, भगवत्प्रपदनेन कीर्त्तनादीनामन्यतमेन दास्यलक्षणेन वा भजनेनैव निरस्तपापाः, अतएव सकलजगत्प्रसिद्धां पापोत्पत्तिं प्रतिपद्यमानाः । श्रुतिपुराण-सिद्धान्तरहस्यगहनगर्भितां तु तन्निःसरणसरणिमविदुषां भवादृशां भ्रान्त्यापि कथञ्चिदुपगमनं स्यादिति हरेर्गदया सर्वतो गुप्तांस्तान्नो-पसीदतेति । अपि च देवानां मध्ये ये सिद्धा माहात्म्यविशेषसम्पन्नाः

निग्रह करनेके लिये ही हम अधिकारी बनाये गये हैं, उन महात्माओंमें तो पापका लेश भी नहीं रहता। यदि किसी प्रकार उनमें पाप हो तो भी उन्हें दण्ड देनेमें हम समर्थ नहीं हैं; क्योंकि वे भगवान्की शरणमें हैं, वे तो कीर्तन आदिमेंसे किसी एकका आश्रय लेकर अथवा दास्यरूप भजनके द्वारा ही भगवान्की शरण जानेसे पापरहित हो गये हैं, इसीलिये समस्त विश्वमें प्रसिद्ध पापोत्पत्तिको वे जानते हैं। जो श्रुति और पुराणोंके सिद्धान्तभूत गहन रहस्यमें छिपी हुई है, उस पापोद्धार-पद्धतिको न जाननेवाले तुझ-जैसे यमदूतोंका भूलसे भी किसी प्रकार वहाँ जाना सम्भव है, इसलिये [हम जता रहे हैं कि] भगवान् विष्णुकी गदासे सब ओरसे सुरक्षित हुए उन लोगोंके पास न जाना। इसके अतिरिक्त देवताओंमें जो विशेष महत्त्वसे युक्त इन्द्र आदि सिद्ध

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरन्दरादयः तैः स्वतःपूतैरप्यतिशयेन पूतत्वाय परिगीता पवित्रभूता गाथा येषां लक्षणापेतमपि यन्नामाङ्कितं पद्यं वा प्राकृतभाषारचितं वा तेषां पूतत्वे कतमः सन्देह इति ।

"स्वपादमूलं भजतः" इत्यत्र तु विविदिषावाक्यविनियुक्तात्कर्मणोऽन्यत्सर्वमेव मुक्तिविरुद्धं कर्म विकर्मशब्देनोच्यते, न निषिद्ध-

---

पुरुष हैं वे भी यद्यपि स्वतः पवित्र हैं तथापि और भी अधिक पवित्र होनेके लिये जिनकी पवित्र गाथाका अर्थात् जिनके लक्षणरहित नामाङ्कित पद्यका अथवा प्राकृतभाषारचित यशोग्रन्थका गान करते हैं उनके पवित्र होनेमें क्या सन्देह है ?

'स्वपादमूलं भजतः प्रियस्य...'* इस वाक्यमें तो विविदिषा[1] (जिज्ञासा) सम्बन्धी वाक्यमें नियुक्त [स्वाध्याय, यज्ञ, दान और तप आदि] कर्मोंको छोड़कर अन्य सभी मुक्तिविरोधी [सकाम आदि] कर्म 'विकर्म' शब्दसे कहे जाते हैं, केवल

---

* स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ।
विकर्म यच्चोत्पतितं कथञ्चिद्धुनोति सर्वं हृदि सन्निविष्टः ॥

—इस श्लोकका अर्थ पहले मूलमें ही दिया जा चुका है ।

१. 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति
यज्ञेन दानेन तपसानाशकेन'

यह विविदिषा (जिज्ञासा) वाक्य है, इसका अर्थ यों है—इस उपनिषत्-प्रतिपादित ब्रह्मको ब्राह्मण लोग वेदोंके स्वाध्याय, यज्ञ, दान और निष्काम तपस्यासे जाननेकी इच्छा करते हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्ममात्रम्, तस्य कीर्त्तनादिमात्रान्निवृत्तेर्दर्शितत्वात् । श्रीपराशरसंहितायामपि "न चलति····" इत्यादिभिरुपलक्षितानां सततं मनसि जनार्दनं दधानानां पापहेतूनां रागादीनामुच्छेदो विवक्षितः, पापक्षयः पुनः कीर्त्तनमात्रात् ।

कमलनयन वासुदेव विष्णो
धरणिधराच्युत शङ्खचक्रपाणे ।
भव शरणमितीरयन्ति ये वै
त्यज भट दूरतरेण तानपापान् ॥

निषिद्ध कर्म ही नहीं; क्योंकि उसकी निवृत्ति तो कीर्तनमात्रसे ही दिखलायी जा चुकी है। श्रीपराशरसंहिता (विष्णुपुराण) में भी "न चलति निजवर्णधर्मतो यः···(जो अपने वर्णधर्मसे विचलित नहीं होता·····)" इत्यादि वचनोंद्वारा उपलक्षित (वर्णित) तथा मनमें सदा भगवान् जनार्दनको धारण करनेवाले भक्त पुरुषोंके पापके कारणभूत रागादिमात्रका ही [भावरूपा भक्तिसे] नाश बतलाना इष्ट है। पापका नाश होना तो यहाँ भी कीर्तनमात्रसे ही कहा गया है; जैसा कि इस [निम्नाङ्कित] वचनसे सिद्ध होता है—

[यमराज दूतको समझाते हुए कहते हैं—] "हे दूत ! [सुनो—] जो लोग 'हे कमलनयन ! हे वासुदेव ! हे विष्णो ! हे धरणीधर ! हे अच्युत ! हाथमें शङ्ख, चक्र धारण करनेवाले हे परमेश्वर ! आप मेरे शरणदाता हों'—इस प्रकार भगवान्को टेरते रहते हैं, उन पापरहित पुरुषोंको तू बहुत दूरसे ही त्याग देना।"

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

इति वचनात् । भक्तानां नरकपातस्यानाशङ्कनीयत्वादेव न तदर्थमयमारम्भः, अपि तु तत्रत्यासन्नजनवर्जनार्थम्; यदाह—"व्रज तान् विहाय दूरात्" "त्यज भट दूरतरेण तानपापान्" "व्रज भट दूरतरेण मानवानाम्" इति च, अतएवोपक्रमेऽपि "परिहर मधुसूदनप्रपन्नान्" दूरत इति व्याख्येयम्। न च स्तुतिमात्रत्वमेषाम्, उपपत्तिमत्त्वात्। तथा हि—

सकलमिदमहञ्च वासुदेवः
परमपुमान्परमेश्वरः स एकः।
इति मतिरचला भवत्यनन्ते
हृदयगते व्रज तान् विहाय दूरात्॥

भक्तोंके नरकमें गिरनेकी तो आशङ्का उचित ही नहीं है, अतः उन भक्तोंका त्याग बतानेके लिये इस वचनका आरम्भ नहीं हुआ है, अपितु जहाँ भक्त हों वहाँके आस-पासमें रहनेवाले लोगोंका त्याग बतलानेके लिये हुआ है; जैसा कि कहते हैं—"ऐ दूत ! उन्हें दूरसे ही त्याग कर चले जाना" "हे दूत ! उन पापरहित पुरुषोंको बहुत दूरसे ही त्याग देना" "उन मनुष्योंके बहुत दूरसे होकर जाना" इत्यादि। इसीलिये इस प्रसंगके आरम्भमें भी कहा है—"मधुसूदनकी शरणमें गये हुओंको छोड़ देना," यहाँ भी 'दूरसे ही छोड़ देना' ऐसी व्याख्या करनी चाहिये। ये उद्धृत किये हुए वचन स्तुतिमात्र नहीं हैं, क्योंकि इनकी उपपत्ति देखी जाती है, जो इस प्रकार है—

सकलमिदमहं च वासुदेवः परमपुमान् परमेश्वरः स एकः।
इति मतिरचला भवत्यनन्ते हृदयगते व्रज तान् विहाय दूरात्॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति । अस्य अनन्ते श्रवणादिभिरावर्जिते हृदयगते सति तत्प्रसादादेवाहमिदमिति भोक्तृभोग्यरूपं सकलं जगद्वासुदेवो माययाच्छन्नचित्प्रकाश एव न तस्मादतिरिच्यते, स हि परमपुमान् पुरुषस्य निरुपाधिकं स्वरूपं परमेश्वरश्च सर्वाधिष्ठानं स एकः स्वरूपेण, एवं सजातीयविजातीयस्वगतभेदविरहान्नितान्तनिर्भेदं भगवत्तत्त्वमिति मतिरचला भवति येषां तान् दूराद्विहाय व्रज भट । तदवलोकनपरिपवित्रिता हि प्राणिनो नैवास्मद्गोचरे वर्त्तन्त

[इसका अर्थ यों है—] श्रवण आदि साधनोंसे आवर्जित (अधीन किये गये) भगवान् अनन्तके हृदयस्थित हो जानेपर उनके अनुग्रहसे ही "मैं' 'यह' इत्यादि भोक्ता-भोग्यरूप समस्त संसार वासुदेव ही है, इसकी ज्ञान-ज्योति मायारूप आवरणसे छिप गयी है, यह वासुदेवसे भिन्न नहीं है, वे वासुदेव परम-पुरुष हैं—पुरुषका निरुपाधिक स्वरूप एवं सबके अधिष्ठानभूत परमेश्वर—वे ही हैं, वे स्वरूपसे एक ही हैं [दो नहीं], इस प्रकार भगवत्तत्त्वमें सजातीय, विजातीय तथा स्वगत भेद न होनेसे वह नितान्त भेदरहित है।'—ऐसी जिनकी स्थिर बुद्धि हो गयी है, हे दूत ! उन्हें दूरसे ही त्यागकर चले जाना; क्योंकि उनके दर्शनमात्रसे [अथवा दृष्टिपातसे] ही परम पवित्र हुए जो प्राणी हैं, वे हमलोगोंके अधिकारमें नहीं रहते—ऐसा इसका

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

इत्यर्थः । एतदेव स्पष्टीकृतम्—पुरुषवरस्य चैतस्य दृष्टिपाते न तव गतिरथ वा ममास्तीति, महद्दर्शनस्य च पावनत्वं प्रसिद्धमेव—

न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥

इत्यादौ ।

दर्शनं चात्र तत्कर्तृकं तत्कर्मकं वा, उभयस्यापि पावन-

तात्पर्य है । इस कथनके द्वारा इसी बातको स्पष्ट किया गया है कि इस श्रेष्ठ पुरुषकी दृष्टि जितनी दूरतक पड़ती है वहाँ तुम्हारी अथवा मेरी गति नहीं हो सकती ।

"केवल जलमय तीर्थ ही तीर्थ नहीं हैं [साधु पुरुष भी तीर्थ हैं] मिट्टी और पत्थरकी मूर्तियोंमें स्थापित देवता ही नहीं देवता हैं [साधु पुरुष भी देवता हैं], वे (जलमय तीर्थ और मूर्तिमय देवता) तो बहुत दिनोंमें पवित्र करते हैं, परन्तु साधु पुरुष तो दर्शनमात्रसे ही पवित्र कर देते हैं [अतः वे उन तीर्थ और देवताओंसे बढ़कर हैं ।]"

इत्यादि वचनोंमें महात्माओंके दर्शनकी पावनता प्रसिद्ध ही है ।

[साधु पुरुष दर्शनमात्रसे ही पवित्र कर देते हैं] इसमें 'दर्शन' शब्दसे तत्कर्तृक[1] या तत्कर्मक[2] इन दोनों प्रकारके दर्शनोंका ग्रहण है; क्योंकि दोनों ही समानरूपसे पवित्र

---

१. जहाँ साधु पुरुष ही किसीको देखें, वहाँ दर्शन-क्रियाके कर्ता साधु ही हैं, अतः वह तत्कर्तृक दर्शन है । २. जहाँ साधु पुरुष दूसरोंके द्वारा देखे जायँ वहाँ दर्शन-क्रियाके कर्म साधु पुरुष हैं, अतः वह तत्कर्मक दर्शन है । साधुओंका दर्शन करनेवाले और साधुओंकी दृष्टिमें पड़नेवाले—दोनों ही तरहके पुरुष पवित्र हो जाते हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वाविशेषाद्, "व्रज भट दूरतरेण तानपापान्" इत्यपि न स्तुतिपरम्, कमलनयनकीर्त्तनध्वनिर्हि सर्वतोविसारी कुड्यादिव्यवधानेऽपि वेधकश्च, अतस्तदन्तराले वर्तमानानामन्धबधिराणामपि सर्वेषामनङ्गुलिप्रेक्षणीयत्वात् तान् दूरतरेण व्रजेत्युपपन्न एव तरबर्थः। अपापानिति च न स्वगतपापाभावो विवक्षितः किन्तु परगतपापनिषेधकत्वं प्रयोजनवशात्।

यमनियमविधूतकल्मषाणा-
मनुदिनमच्युतसक्तमानसानाम्।

करनेवाले हैं। "व्रज भट दूरतरेण तानपापान्" यह भी स्तुतिपरक नहीं है, कारण कि कमललोचन भगवान् विष्णुकी कीर्तन-ध्वनि सब ओर फैलनेवाली और दीवारका अन्तर होनेपर भी उसे बेधकर पहुँचनेवाली है, इसलिये उसके अन्दर वर्तमान समस्त प्राणियों यहाँतक कि अन्धे और बहिरों-की भी ओर अंगुलीके इशारेसे भी देखना उचित नहीं है; इसलिये "उनसे दूरतर (बहुत दूर) होकर जाना" इस कथनमें ['दूरतर' शब्दके] तरप् प्रत्ययका [बहुत दूर] अर्थ युक्तियुक्त ही है। 'अपापान्' इस पदसे भी स्वगत पापका अभाव नहीं विवक्षित है, अपि तु स्वसमीपवर्ती दूसरोंके पापका निवारण करना ही विवक्षित है; क्योंकि दूसरोंके लिये ही उसका प्रयोजन है।

"हे दूत! यम और नियमसे जिनके पाप धुल गये हैं, जिनका चित्त नित्यप्रति भगवान् विष्णुमें लगा रहता है,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपगतमदमानमत्सराणां
व्रज भट दूरतरेण मानवानाम् ॥

इत्यत्रापि नियमे स्वाध्यायस्यान्तर्भावात् तस्य च परदेवता-प्रकाशकमन्त्रोच्चारणात्मकत्वाद् भक्त्यावेशवशादुच्चैरुच्चारणस्यापि सम्भवाद् विवक्षित एव तरबर्थः। उत्तमभागवतास्तु दुर्लभदर्शनास्तेषां हि बहिर्विरलः प्रचारः, प्रचरन्तोऽप्यनुपासितशरीरतया न सर्वरूप-

---

जिनके मद, मान और मात्सर्य दूर हो गये हैं उन मानवोंके बहुत दूरसे होकर जाना।"

—इस वचनमें भी तरप् प्रत्ययका ['बहुत दूरसे' यह] अर्थ विवक्षित ही है; क्योंकि नियमके अन्दर स्वाध्यायकी गणना है और स्वाध्यायका स्वरूप अपने इष्टदेवको प्रकाशित करनेवाले मन्त्रका उच्चारण करना है; ऐसी स्थितिमें भक्तिके आवेशसे इष्टदेवके मन्त्रका जोर-जोरसे उच्चारण होना भी सम्भव है [अतः थोड़ी दूरके लोगोंके लिये तो उस उच्चारण-से ही पवित्र हो जानेकी सम्भावना है; इसलिये बहुत दूरसे होकर जाना आवश्यक ही है]। किन्तु जो उत्तम भगवद्भक्त हैं उनका तो दर्शन ही दुर्लभ है, क्योंकि उनका बाह्य जगत्में बहुत कम आना-जाना रहता है, यदि वे घूमते-फिरते भी हों तो भी सर्वसाधारणके द्वारा उनके शरीरकी उपासना की हुई न होनेके कारण वे सबको दिखायी नहीं देते। उनकी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लभ्यन्ते, तेषामपि युगमात्रावलोकिनां कथंचित्कश्चिल्लोचनगोचर-मवतरतीति दूरादित्युक्तम् ।

> यस्य देवे च मन्त्रे च गुरौ च त्रिषु निश्चला।
> न व्यवच्छिद्यते भक्तिस्तस्य सिद्धिर्न दूरतः ॥

इत्यादौ तु सिद्धिरपवर्गादिलक्षणा; न पापक्षयलक्षणा, वचनान्तरानुरोधात् । तस्मात्केवलं कीर्त्तनादि पापक्षयहेतुः, न तत्र भक्तिरङ्गम्, अधिकारिविशेषणं वा ।

दृष्टि भी केवल दो ही हाथ आगेतक रहती है, अतः उनकी दृष्टिका विषय भी कोई कथंचित् ही हो पाता है, इसीलिये 'सकलमिदमहं च' इस श्लोकमें 'दूरतरेण' न कहकर 'दूरात्' यह कहा है।

"देवता, मन्त्र और गुरु इन तीनोंमें जिसकी अटल भक्ति कभी उच्छिन्न नहीं होती उसको सिद्धि मिलना दूर नहीं है।"

इत्यादिमें तो अपवर्ग (मोक्ष) आदि सिद्धिका ही कथन है, पापक्षयरूप सिद्धिका नहीं; क्योंकि अन्य वचनोंकी सम्मति-से यही बात सिद्ध होती है। इसलिये केवल कीर्तन आदि ही पापक्षयके कारण हैं, भक्ति न तो कीर्तन आदिका अङ्ग है और न कीर्तनादिके अधिकारीका ही विशेषण है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिधेयज्ञानस्य कीर्तनाङ्गतायाः प्रत्याख्यानम्

अभिधेयज्ञानमपि नाङ्गं प्रमाणाभावादेव।

ननु दर्शितं प्रमाणम्।

सत्यं दर्शितम्, न तु तदङ्गत्वे प्रमाणम्, "यद् व्याजहार विवशो" "हरिरित्यवशेनाह" "साङ्केत्यं पारिहास्यं वा" "हरिरवशाभिहितोऽप्यघौघनाशः" "अवशेनापि यन्नाम्नि कीर्त्तिते" "हरिरिति

इसी प्रकार कोई प्रमाण न मिलनेके कारण ही अभिधेय (कीर्तनीय परमेश्वर) का ज्ञान भी [कीर्तनादिका] अङ्ग नहीं है।

पूर्वपक्षी—प्रमाण तो [इस विषयमें] अनेकों दिखलाये गये हैं।

सिद्धान्ती—यह सत्य है, [कीर्तनके विषयमें] प्रमाण दिखलाये गये हैं, परन्तु वे [अभिधेय-ज्ञानके] कीर्तनका अङ्ग होनेमें प्रमाण नहीं हैं; क्योंकि "यद्व्याजहार विवशो......" "हरिरित्यवशेनाह..." "साङ्केत्यं पारिहास्यं वा..." "हरिरवशाभिहितोऽप्यघौघनाशः" "अवशेनापि यन्नाम्नि कीर्तिते" "हरिरिति सकृदुच्चरितं दस्युच्छलेनापि यैर्मनुजैः" इत्यादि*

---

* ये सभी वचन, जो यहाँ प्रतीकरूपमें कहे गये हैं, पहले पूर्णरूपमें आ चुके हैं, और उन-उन स्थलोंपर इनका अर्थ भी लिखा जा चुका है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सकृदुच्चरितं दस्युच्छलेनापि यैर्मनुजैः" इत्यादिबहुतरप्रमाणविरोधात्, न चैतेषामतत्परत्वम्, अभ्यासगतिसामान्याभ्यामित्यवादिष्म।

नन्वपिशब्दयोगादेषामतत्परत्वम्।

मैवम्, भागासिद्धत्वाद्धेतोः, "यद् व्याजहार विवशो" इत्यादावदर्शनात्।

बहुत अधिक प्रमाणोंसे विरोध है। इन वचनोंका स्वार्थमें तात्पर्य नहीं है—ऐसा भी नहीं कह सकते; क्योंकि अभ्यास[1] और गतिसामान्यसे[2] इनका स्वार्थमें तात्पर्य सिद्ध होता है—यह हम बतला चुके हैं।

पूर्वपक्षी—परन्तु 'अपि' शब्दका योग होनेसे यह सिद्ध होता है कि इन वाक्योंका स्वार्थमें तात्पर्य नहीं है।

सिद्धान्ती—ऐसा कहना ठीक नहीं; कारण यह है कि [अपि शब्दका योग होनेसे—यह] हेतु भागासिद्धि[3] दोषसे दूषित है, क्योंकि "यद्व्याजहार विवशो···" इत्यादिमें अपि शब्दका योग नहीं देखा जाता।

---

१. एक ही ग्रन्थमें किसी विषयकी बार-बार आवृत्तिको अभ्यास कहते हैं।

२. अनेकों ग्रन्थोंमें किसी विषयकी सामान्यरूपसे उपलब्धि होनेको 'गतिसामान्य' कहते हैं।

३. जहाँ साध्यकी सिद्धि करनी हो उसे पक्ष कहते हैं, साध्यमें जो हेतु होता है उसका पक्षतावच्छेदकमात्र [अर्थात् सम्पूर्ण पक्ष] में व्यापक होना आवश्यक है; यदि किसी पक्षमें वह व्यापक न हो तो भागासिद्धि दोषसे दूषित हो जाता है, ऐसी दशामें वह साधक नहीं होता। यहाँ ऊपर उद्धृत सभी वाक्योंको पक्षतावच्छेदक मानकर उनमें अविवक्षितस्वार्थत्व

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ननु तत्राप्यध्याहार्योऽपिशब्दस्तदर्थस्य विवक्षितत्वात्, अन्यथा ज्ञानपूर्वककीर्त्तनस्यापावनत्वप्रसङ्गात् ।

तदयुक्तम्, न हि श्रुतबाधयाध्याहरन्ति, अपि तु श्रुतोपपत्तये।

पूर्वपक्षी–वहाँ भी 'अपि' शब्दका अध्याहार कर लेना उचित है; क्योंकि 'अपि' शब्दका अर्थ वहाँ विवक्षित है; अन्यथा ज्ञानपूर्वक किये हुए कीर्तनके अपावन (पवित्र न करनेवाला) होनेका प्रसंग उपस्थित हो जायगा।*

सिद्धान्ती–यह कथन युक्तिसङ्गत नहीं है, क्योंकि श्रुत अर्थका बाध करनेके लिये अध्याहार नहीं किया करते, अपि तु श्रुतकी उपपत्ति (सिद्धि) के ही लिये करते हैं [तुम तो अपिके अध्याहारसे श्रुत अर्थको स्वार्थमें तात्पर्य न रखनेवाला

(स्वार्थमें तात्पर्यका अभाव) सिद्ध करना इष्ट है और इसके लिये 'अपि शब्दका योग' ही हेतुरूपसे निर्दिष्ट हुआ है। यह हेतु 'यद्यथाजहार विवशः' इत्यादिमें व्यापक नहीं है, क्योंकि वहाँ अपि शब्दका प्रयोग नहीं है। अतः इसमें भागासिद्धि दोष है, इसलिये यह हेतु साधक नहीं हो सकता।

* 'अपि' शब्दका अध्याहार होनेपर यह भाव व्यक्त होता है कि बिना ज्ञानके विवश होकर भी किया हुआ कीर्तन यदि इतना पवित्र करनेवाला है तो ज्ञानपूर्वक और श्रद्धाके साथ किया हुआ कितना पावन होगा ? इस तरह जान-बूझकर किये हुए कीर्तनका महत्त्व अधिक सिद्ध होता है, यदि [भीका वाचक] 'अपि' शब्द न रहे तो उक्तरूपसे व्यञ्जना नहीं हो सकती, अतः जान-बूझकर किये हुए कीर्तनका कोई महत्त्व नहीं रह जाता।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं च सिद्धमेवावशात् कीर्त्तनस्य पावनत्वम्। अपि च, अपिशब्द-योगे तदपि स्यात्, न तु तदेवेत्येतावत्, न पुनस्तन्न भवत्येव।

नन्वपिशब्दयोगे तात्पर्यमन्यत्र स्यात्; अतात्पर्यविषये बाधकाभावसव्यपेक्षमेव प्रामाण्यम्, एषां च बाधकस्य विद्यमानत्वान्न प्रामाण्यमिति।

इदमसाधु, ज्ञानाख्यगुणविधायकं हि तस्य बाधकम्; न च

बताकर उसका बाध करते हो!]; इस प्रकार विवश होकर नामकीर्तनकी पावनता सिद्ध ही है। इसके अतिरिक्त 'अपि' शब्दका योग रहनेसे यही प्रकट होता है कि [जिसका 'अपि' शब्दसे आक्षेप होता है] वह भी हो सकता है, परन्तु यह व्यक्त नहीं होता कि केवल वही हो और जो श्रुत अर्थ है वह हो ही नहीं। [अतः विवश होकर और जान-बूझकर—दोनों ही प्रकारसे किया हुआ कीर्तन पवित्र करनेवाला है—यह सारांश हुआ]

पूर्वपक्षी—किन्तु 'अपि' शब्दका योग रहनेपर तात्पर्य अन्यत्र ही होगा और जिस विषयका स्वार्थमें तात्पर्य नहीं है उसमें बाधकके अभावकी अपेक्षा रखती हुई प्रमाणता रहती है, इन वाक्योंके बाधक विद्यमान हैं, अतः ये प्रमाणभूत नहीं हैं।

सिद्धान्ती—यह कथन ठीक नहीं है; क्योंकि ज्ञान नामक गुणका विधायक वचन ही उसका (पापक्षयरूप फल-वचनका)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

"यतस्तद्विषया मतिः" इत्यादेर्विधायकत्वम्, उपपत्त्यर्थवादो ह्यसौ, सर्वानर्थनिर्बर्हणीं ब्रह्मविद्यामुत्पादयतः पापनिर्हरणे कियान् प्रयास इति। "नाम स्वस्त्ययनं हरेः"[1]इति स्वस्तिशब्देन मोक्षोऽभिधीयते, स्वस्तीत्यविनाशिनामेति नैरुक्ताः। मोक्षसाधनत्वं च न विधीयते पदार्थशक्तेरविधेयत्वात्, किन्तु सिद्धमेव सङ्कीर्त्यते श्रुतसाध्यत्वोपपत्त्यर्थम्, तद्वदत्रापि।

नन्वर्थवादाद्विधिः श्रेयान्।

बाधक हो सकता है। "जिससे भगवत्तत्त्वका ज्ञान होता है" इत्यादि वचन विधायक नहीं हैं अपि तु ये उपपत्तिमूलक अर्थवाद हैं। [किस प्रकार अर्थवाद हैं यह दिखलाते हैं—] जो भगवन्नाम समस्त अनर्थोंको निवृत्त करनेवाली ब्रह्मविद्याकी उत्पत्ति करनेवाला है, उसको पापनाश करनेमें कितना प्रयास करना पड़ेगा? "नाम स्वस्त्ययनं हरेः (भगवान्का नाम मोक्षका आश्रय है)" इस वाक्यमें 'स्वस्ति' शब्दसे 'मोक्ष' कहा गया है; निरुक्तवेत्ताओंका कथन है कि 'अविनाशी' (नित्य मोक्ष) का नाम 'स्वस्ति' है। नाम मोक्षका साधन है—ऐसा भी विधान नहीं किया जाता, क्योंकि जो पदार्थकी शक्ति होती है वह विधेय नहीं होती; अपि तु श्रुत विषयकी साध्यताकी उपपत्तिके लिये उसका सिद्धरूपसे ही वर्णन किया जाता है; इसी प्रकार यहाँ ('यतस्तद्विषया मतिः') इस वचनमें भी विधि नहीं है।

पूर्वपक्षी—किन्तु 'अर्थवादसे तो विधि ही श्रेष्ठ है' [इस न्यायसे विधि ही मानना अच्छा है।]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र श्रेयान् यत्र गुणवादः प्रसज्येत, इह पुनरर्थवादत्वेऽपि यथार्थवाद एवेति नायं न्यायः। अपि च बहुतराणां स्वरसत एव प्रतीयमानं प्रमाणान्तरैरविरुद्धमनधिगतमुपयुक्तमर्थमनु-

सिद्धान्ती–[हाँ, विधि श्रेष्ठ है, परन्तु] वहाँ श्रेष्ठ है जहाँ गुणवादका प्रसंग उपस्थित होता हो। यहाँ तो अर्थवाद होनेपर भी [गुणवाद नहीं] यथार्थवाद ही है। अतः यहाँ इस न्यायकी प्रवृत्ति नहीं हो सकती। इसके अतिरिक्त बहुत-से वचनोंके जो स्वरसतः (बिना किसी क्लिष्ट कल्पनाके) प्रतीत होनेवाले उपयोगी अर्थ हैं, जिनमें न तो दूसरे-दूसरे प्रमाणोंसे विरोध पड़ता है और न वे पहलेसे ज्ञात ही हैं [तात्पर्य यह कि जो सर्वथा मौलिक और प्रामाणिक अर्थ हैं] उनका अनुवाद (चर्चा) करके उन वचनोंमेंसे ['यतस्तद्विषया मतिः' इत्यादि] दो-

१. अर्थवाद तीन तरहके होते हैं—गुणवाद, अनुवाद और भूतार्थवाद। जहाँ अन्य प्रमाणोंसे विरोध हो वह गुणवाद कहलाता है, जैसे 'आदित्यो यूपः' 'यजमानः प्रस्तरः' इत्यादि वाक्योंमें यूप (यज्ञस्तम्भ) को सूर्य तथा यजमानको प्रस्तर कहा गया है; यहाँ प्रत्यक्ष प्रमाणसे विरोध है। अन्य प्रमाणोंद्वारा ज्ञात अर्थके बोधक वचनको अनुवाद कहते हैं, जैसे 'अग्निर्हिमस्य भेषजम् (अग्नि शीतकी दवा है)' इत्यादि। 'अग्निसे शीतका कष्ट दूर होना' प्रत्यक्ष है। जो अन्य प्रमाणोंसे न तो ज्ञात हो और न विरुद्ध ही हो उस अर्थका बोधक वाक्य भूतार्थवाद है, जैसे 'इन्द्रो वृत्राय वज्रमुदयच्छत् (इन्द्रने वृत्रासुर [को मारने] के लिये वज्र उठाया था)' इत्यादि। इनमेंसे गुणवादका स्वार्थमें तात्पर्य नहीं होता। शेष अर्थवाद यथार्थवाद ही हैं, उनका अर्थ प्रामाणिक होता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाद्य द्वित्राणां वा विधित्वं कल्प्यताम्; सर्वेषां च स्वं स्वमर्थमजहतामर्थवादत्वमिति मीमांसायामपङ्क्तिभेद एव श्रेयान् । अपि च कैमुत्यविवक्षायां दृष्टान्ता नोपपद्यन्ते—

अज्ञानादथ वा ज्ञानादुत्तमश्लोकनाम यत् ।
संकीर्त्तितमघं पुंसां दहत्येधो यथानलः ॥
यथागदं वीर्यतममुपयुक्तं यदृच्छया ।

तीनको ही विधि [और शेषको अर्थवाद] मान लिया जाय अथवा अपने-अपने मुख्य अर्थका त्याग न करते हुए सभी वचनोंको उपपत्तिमूलक अर्थवाद माना जाय ? इस प्रकारका सन्देहमूलक विचार उपस्थित होनेपर पङ्क्तिभेद (किसीको विधि और किसीको अर्थवाद माननेकी विषमता) न करना ही अच्छा प्रतीत होता है। इसके सिवा [यदि कहो, अनजानमें किये हुए नामकीर्तनका महत्त्व बतलानेवाले सभी वचन कैमुत्य-विवक्षामें हैं, तो ठीक नहीं; क्योंकि] कैमुत्य[1]-विवक्षामें—

"पुण्यकीर्ति भगवान्‌का जो नाम है उसका यदि जान-बूझकर या बिना जाने भी कीर्तन किया जाय तो वह मनुष्योंके पापोंको उसी प्रकार जला देता है जैसे आग ईंधनको ।" "जिस प्रकार प्रबल औषध स्वेच्छासे उपयोगमें लाये जानेपर अपने गुणोंको न जाननेवाले मनुष्यके लिये भी लाभकारी होता ही है, उसी प्रकार

१. अनजानमें नाम-कीर्तन करनेसे यदि पापोंका नाश हो जाता है, तो जान बूझकर कीर्तन करनेपर तो कहना ही क्या है ?—यही कैमुत्य-विवक्षा है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अजानतोऽप्यात्मगुणान् कुर्यान्मन्त्रोऽप्युदाहृतः ॥
हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।
अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः ॥

इत्यादयः, साध्यवैकल्यात्। न हि तेषु कैमुत्यमस्ति; अपि तु ज्ञानाज्ञानयोः साधारण एव साधनभावः, अपि च "नारायणेत्येतज्जगाद चतुरक्षरम्" "हरिरित्यक्षरद्वयम्" इति वदन् शब्द एव विवक्षितो नार्थानुसंधानमित्यभिसंधत्ते । अन्यच्च "यतस्तद्विषया

उच्चारण किया हुआ मन्त्र अपना प्रभाव न जाननेवालेके प्रति भी लाभदायक होता ही है।" "दूषित चित्तवाले पुरुषोंके भी स्मरण करनेपर भगवान् विष्णु उनके पापोंको हर लेते हैं, जैसे अनिच्छासे भी स्पर्श करनेपर आग जला ही देती है।"

इत्यादि दृष्टान्तोंकी उपपत्ति (सिद्धि) नहीं होती; क्योंकि यहाँ साध्य (कैमुत्य) की विकलता है। इन वचनोंमें कैमुत्य-विवक्षा नहीं है, अपि तु जानकर या विना जाने—दोनों ही दशाओंमें नाम-कीर्तनको समानरूपसे पापक्षयका साधन वतलाया गया है। अपि च, "[जिस समय अजामिलने] 'नारायण' इस चार अक्षरका उच्चारण किया" " 'हरि' यह दो अक्षर···" इत्यादि वचनोंका आरम्भ करते हुए यही बतलाते हैं कि ['नारायण' और 'हरि' आदि] शब्दमात्रका ही उच्चारण करना इष्ट है, उनके अर्थका अनुसन्धान करना नहीं। [इससे भी यह नहीं सिद्ध होता कि ज्ञान कीर्तनका अङ्ग है] । इसके सिवा, 'यतस्तद्विषया मतिः (जिस

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

मतिः" इत्यादौ न विधिः कल्पयितुं शक्यते, साधिकारं हीदं वाक्यम्, न च साधिकारे वाक्ये गुणविधिमनुमन्यन्ते न्यायविदः। वैरूप्यं हि तदा प्रसज्येत, प्रवृत्तिरपि स्वविषयज्ञानापेक्षिणी न पुनर्नामिज्ञानापेक्षिणी। तस्मान्न ज्ञानमङ्गं कीर्तनस्य, नाप्यधिकारहेतुः।

